नं. ४८०७

नाम - दर्शपौर्णमास पद्धतिः

कर्त्ता - ×

पत्र - २३ पत्राणि सं. ×

विषयः - सूत्रपद्धतिः

दार्शीपौर्णमासपद्धतिः

५८०७

श्रीगणेशायनमः ॥ अथदर्शपौर्णमासपद्धतिः ॥ आचांतोबद्धशिखोदर्भपाणिः ॥ स्वेशा
पयहकृतप्राणायामः ॥ पूर्वोच्चरित॰तिथौ॰यजमानानुज्ञया श्रीपरमेश्वरप्रीत्यर्थं
दर्शपौर्णमासाभ्यामहंयक्ष्ये ॥ तत्रादौपौर्णमासेनाहंयक्ष्ये ॥ पंचभूसंस्कारपूर्वकंगा
र्हपत्यान् आहवनीयदक्षिणाग्न्योरुद्धरणं ॥ अग्नीन्धकरणं ॥ अध्वर्युः ॥ यजमानोवांप॰
षट् समिधोगृहीत्वा ॥ अग्निमष्टाकपालेनपुरोडाशेन ॥ उपांशु ॥ अग्नीषोमौध्रुवायाश्च
तुर्गृहीतेनाज्येन ॥ उच्चैः ॥ अग्निषोमौविकादशकपालेनपुरोडाशेन ॥ सद्योहंयक्ष्ये ॥
दर्शे ॥ अग्निमष्टाकपालेनपुरोडाशेन ॥ उपांशु ॥ विष्णुं ॥ ध्रुवायाः चतुर्गृहीतेना
ज्येन ॥ उच्चैः ॥

॥ दर्शपौ ॥
॥ ९ ॥

इंद्राग्नीद्वादशकपालेन पुरोडाशेन ॥ श्वोहंयक्ष्ये ॥ तत्र पंचदशोवज्रः ॥ यवैर्यागः
व्रीहिभिर्वा ॥ ममाग्नेपक्षः ॥ अन्वाहार्योदक्षिणा ॥ उत्तमे काले व्रतोपायनं ॥ ए
केचनवैकल्पिकाः पदार्था सेक्षविकुत्यस्यनमया अवधारिताः ॥ इषेत्वा
दिषुमंत्रेषुनमउक्तिं विधेमेसंतंयाक्रियासत्रविवस्वान् ऋषिः ॥ सर्वाणिछंदांसि
सिसर्वाणियजूंषि परमात्मादेवतामारभ्यं कर्मणिविनियोगः ॥ ॐ ममाग्नेवर्चो
विहवेष्वस्तुवयंत्वेंधानास्तन्वंपुषेम ॥ मह्यंनमंतांप्रदिशश्चतस्रस्त्वयाध्यक्षे
णपृतनाजयेम ॥ आहवनीयेसमिधमादधाति ॥ तूष्णींद्वितीयां ॥ एवंगार्ह
पत्येतथैवदक्षिणाग्नौ ॥ मांसमैथुनेवर्जयामीतिसंकल्पः ॥ वपनंवा ॥

हेरंब
॥ ९ ॥

अंतरेणापराग्नीगत्वापरेणाहवनीयं ॥ प्राङ्ङ्तिष्ठन् ॥ अग्निमीक्षमाणोपउप
स्पृश्य ॥ व्रतमुपैत्यग्ने व्रतपत इति ॥ ॐ अग्ने व्रतं राध्यतां ॥ षडासनं ॥ गार्ह
पत्यस्योत्तरतः ॥ ब्रह्मयजमानयोः ॥ आहवनीयस्य दक्षिणतश्च ब्रह्मयजमा
नयोः ॥ गार्हपत्यस्योत्तरतः प्रणीतायै ॥ आहवनीयस्योत्तरतः प्रणीतायै ॥ द
क्षिणाग्निर्दक्षिणतः पत्न्याश्च ॥ गार्हपत्यस्योत्तरत उदङ्मुखो यजमानः ॥
प्राङ्मुखं ब्रह्माणं वृणीते ब्रह्मिष्टं ॥ पौर्णमासेष्ट्याहं यक्ष्ये ॥ तत्र त्वं ब्रह्मा भव ॥ भ
वामि ॥ भूपते भुवनपते महतो भूतस्य पते ब्रह्माणं त्वा वृणीमह इति ब्रतो जपति ॥
ॐ अहं भूपतिरहं भुवनपतिरहं महतो भूतस्य पतिर्भूर्भुवः स्वर्देव सवितरेतं

गार्हपत्यस्य सनैऋत्य... (margin note: गार्हपत्यस्य नैर्ऋत्य...)

॥१॥ त्रीपोत्वावृणते॥ मनुष्याणां॥ भूर्भुवस्वः॥ यजमानः वाचस्यते यज्ञंगोपाय॥ ब्रह्मागोपा
॥२॥
वा
यामि॥ अपरेणाहवनीयंदक्षिणातिक्रामन्ति॥ अहेदेधिषव्योदत स्तिष्ठान्यस्य सद
नेसीदयोस्मत्पाकतरइति॥ ब्रह्मसदनमीक्षते॥ ब्रह्मसदनात्तृणंनिरस्यति॥
ॐ भूर्भुवस्वः निरस्तः पाप्मा सहतेनयंद्विष्मः॥ उद०॥ इदमहं बृहस्पतेः सद
सिसीदामि॥ प्रसूतोदेवेनसवित्रानदन्तय प्रब्रवीमि तद्वायवेतस्पृथिव्यै॥१॥
ब्रह्मसदनआहवनीयमभिमुखउपविशति पश्चाद्यजमानोवेदिस्पृक्॥ वा
ग्यतः॥ अनुयाजाप्रसवान्॥ ततोध्वर्युः स्फ्योपग्रहः॥२॥ गार्हपत्यमुत्तरेणो
दपात्रंनिधायालभते॥ ॐ भूतस्त्वा भूतकरिष्यामि॥ ब्रह्मन्नपः पणेष्यामि॥ ॥२॥

यजमानवाचंयच्छ ॥ ओं प्रणयय यज्ञं देवता वर्धयत्वंन्नाकस्यपृष्ठे यजमानोअस्तु ॥ सप्तऋषीणांसुकृतांयत्र लोकस्तत्रेमंयज्ञंयजमानंच धेहि ॥ ओं प्रणयेति ॥ ब्रह्मानुज्ञातउत्तरेणाहवनीयंसंप्रतिनिदधाति कस्त्वेति ॥ ओं कस्त्वायुनक्ति सत्वायुनक्ति कस्मैत्वायुनक्ति तस्मैत्वायुनक्ति ॥ नांतरेण गच्छेयुः ॥ तृणैरग्नीन्परिस्तीर्येपुरस्तात्प्रथमं ॥ द्विशः पात्रासादनं ॥ अध्वर्योर्यजमानस्यवा ॥ शूर्पाग्निं कण्वानानु अग्निहोत्र हवनी शूर्प अग्निहोत्रहवणीं स्फ्यः कपालानिशम्याकृष्णाजिनं ॥ उलूखलमुसलं ॥ दृषदुपलं ॥ पात्रीपवित्रच्छेदनानि ॥ पवित्रेउपवेषश्च ॥ आज्यस्थाल्युपसर्जनीपात्रंकुशमुष्टिरन्वाहार्यपात्रंच ॥ वेदितृणमग्निश्च ॥ योक्त्रंस्रुवश्च ॥ जुहुउपभृच्च ॥

3

ध्रुवाऽसन्नमहनावच्छादनानितृणानिच॥ परिधयोविधृत्योच॥ आज्यंपुरोडाशेपा
त्र्योच॥ होतृषदनंभृत्तावदानंच॥ ओषधंप्राशित्रहरणेच॥ अन्वाहार्यतंडुलाअंतर्धान
कटश्च॥ होतृसमित्पूर्णपात्रंपक्षेसमिच्च॥ इध्माबर्हिषोः॥ उपकल्पनंषडवत्तंच॥ गार्हपत्ये
श्रौपर्णस्यपश्चात्स्फ्यापहितपात्र्यामोषधकरणं॥ कर्मणोवामितिशूर्पाग्निहोत्रहवण्या
दाय॥ ॐ कर्मणेवांवेषायवांआददे॥ वाचंयच्छत्यध्वर्युस्तयोरेवप्रतपनंगार्हपत्ये॥ प्रत्यु
ष्टंनिष्टप्तमि॥ ८ तिवा॥ ॐ प्रत्युष्टꣳरक्षः प्रत्युष्टाऽअरातयः॥ उदकोपस्पर्शः॥ गच्छ
स्फर्वंतरिक्षमिति॥ ॐ उर्वंतरिक्षमन्वेमि॥ श्रपणस्यपश्चाद्धूरीषारोहणानिपात्रीवि
तेजपति॥ ॐ धूरसिधूर्वधूर्वंतधूर्वतं व्हार्षीत्॥ अथाक्रमता॥ विष्णुस्त्वाक्रमतां॥ प्र

क्षंत उरु वातायेति हविष्यानू ॥ ॐ उरु वाताय भव ॥ अपहतमिति निरस्यत्यन्यतू ॥ ॐ
अपहतꣳ रक्षः ॥ उद॰ । अविद्यमानेऽभिमृश्तेनू ॥ यच्छंतामित्यालभंते ॥ ॐ यच्छंतां पंच ॥ देव
स्यत्वेति गृह्णात्याग्नेयं चतुरो मुष्टीनू ॥ ॐ देवस्य त्वा सवितुः॰ हस्ताभ्यां ॥ अग्नये जुष्टं गृह्णामि
॥ एवं त्रिः ॥ तूष्णीं चतुर्थं ॥ एवमेव ॥ अग्नीषोमाभ्यां जुष्टं गृह्णामि ॥ ति ॥ अग्नीषोमीयस्य द
र्शे ॥ इंद्राग्निभ्यां जुष्टं गृह्णामिति ॥ भूतायत्वेति शेषाभिमर्शनं ॥ ॐ भूतायत्वानारातये ॥
परिश्रोषयामि ॥ स्वरिति प्राङीक्षते ॥ ओं स्वरभिविख्येषं ॥ दृꣳहंतामित्युथानं ॥ ॐ दृꣳ
हंतां दुर्याः पृथिव्यां ॥ गच्छत्सुर्वंतरिक्षमिति ॥ ॐ उर्वंतरिक्षमन्वेमि ॥ श्रपणस्य पश्चात्सा
दयति ॥ पृथिव्यास्त्वेति ॥ ॐ पृथिव्यास्त्वा नाभौ सादयाम्यदि [illegible]दित्याऽउपस्थे ॥ अग्नेहव्यं
ꣳ रक्षस्व ॥ कुशौ समावप्रच्छीर्णग्रावनंतर्गर्भौ कुशैश्छिनत्ति पवित्रेस्थ इति त्रीन्वा ॥ ॐ

पवित्रे स्थो वैष्णव्यौ छित्वा ॥ हविर्ग्रहण्यामपः कृत्वा ताभ्यामुत्पुनाति सवितुर्व इति ॥ ॐ सवि
तुर्वः प्र० रश्मिभिः ॥ तास्थानं तयोः सव्ये कृत्वा दक्षिणेनोदिंगयति देवीराप इति ॥ ॐ देवीरापो०
वा युवं ॥ युष्मा ऽ इंद्रोवृणीत वृत्रतुर्ये यूयमिंद्रमवृणीध्वं वृत्रतूर्ये प्रोक्षितास्थेति तां सां प्रोक्ष
णं ॥ ॐ प्रोक्षितास्थ ॥ हविश्च ॥ ॐ ब्रह्मन्हविः प्रोक्षिष्यामि ॥ उपांशु ॥ ॐ प्रोक्ष० धेहि० ॥ उ
च्चैः ॥ ॐ प्रोक्ष ॥ ॐ अग्नये त्वा जुष्टं प्रोक्षामि ॥ अग्नीषोमाभ्यां त्वा जुष्टं प्रोक्षामि ॥ दर्शे ॥ अग्न
ये त्वा जुष्टं प्रोक्षामि ॥ इंद्राग्नीभ्यां त्वा जुष्टं प्रोक्षामि ॥ २ पात्राणि दैव्यायेति ॥ ॐ दैव्याय क
र्मणे न मुलूखलमुसलशम्यादृषदुपलशूर्पपात्र्यूपवेषकपालानि प्रोक्ष्य ॥ आज्यस्थाल्या
दीनां यथासादितानामिध्माबर्हिर्वर्जमेके कुशाः प्रोक्षणं ॥ वज्रवर्जमाज्यं तद्यथा ॥ ५ ॥
शुंधध्वं दैव्याय कर्मणे ॥ यद्वोऽशुद्धाः पराजघ्नुरिदं वस्तच्छुंधामि ॥ आदौ वज्रं प्रोक्ष्य ॥ तमेव सव्ये कृत्वा ॥ कृष्णाजि० उपगत

कृष्णाजिनं प्रोक्षामि॥ उलूखलं०॥ मुसलं०॥ शम्यां० दृषदं० उपलां० शूर्पं० पात्रीं० उपवेषं० कपालानि० आज्यस्थालीं० उपसर्जनीपात्रं० कुशमुष्टिं० अन्वाहार्यपात्रं० वेदितृणं० अग्निं योक्त्रं० स्रुवं० जुहुं० उपभृतं० ध्रुवां० सन्नहनाव च्छादनानि तृणानि० परिधीन्० विधृत्यौ० आज्यं० पुरोडाशपात्र्यौ० होतृषदनं० इलावदानं० प्राशित्रहरणे० अन्वाहार्यतण्डुलान्० अंतर्धानिकटं० पूर्णपात्रं० होतृसमित्सक्षेसमिधं प्रोक्षामि॥ इध्माबर्हिर्वर्जं षड्वतं प्रोक्षामि॥ असंचरे प्रोक्षणीनिर्धानं॥ शर्मासीति कृष्णाजिनादानं॥ ॐ शर्मासि अपत्यं पात्रेभ्यो वधूनोत्यवधूतमिति॥ ॐ अवधूतꣳ रक्षो वधूता ऽअरातयः॥ उद०॥ प्रत्यग्रीवमास्तृणात्यदित्यास्त्वगिति॥ ॐ अदित्यास्त्वगसि प्रति त्वादितिर्वेत्तु॥ सव्याभून्ये निदधात्युलूखलमद्रिरसि ग्रावासीति वा॥ अद्रिरसि०॥ त्वग्वेत्तु॥ शूर्पाद्धविरावपत्से प्रोणितास्मा र्म ... प्रोक्षणी निधानं

धर्मा

॥द्रशीयो॰॥ ग्नेस्तनूरिति॥ॐ अग्नेस्तनूरसि वाचो विसर्जनं॥ गृह्णामि॥ वाग्विसर्गो ध्वर्युर्यजमानश्च॥
॥५॥ नानाबीजेष्वंते सामर्थ्यात्॥ बृहन्ग्रावेति मुसलमादत्ते॥ॐ बृहन्ग्रावासि वानस्पत्यः स
इदं मिसवद धाति॥ॐ स इदं देवेभ्यो हव्यं शमीष्व सु शमि शमीष्व॥ हविष्कृदेहीति
5 त्रिराह्वयति॥ हविष्कृदेहि॥ अतः पत्न्यवहंति॥ आहंत्यन्यो दृषदुपलेकुक्कुटोसीति
॥ त्रिराम्यया हि दृषद उपलां॥ॐ कुक्कुटोसि॰ जेष्म॥ आग्नीध्रः कंडनं॥ व
र्षवृद्धमसीति शूर्पमादत्ते॥ॐ वर्षवृद्धमसि॥ प्रतित्वेति हविरुद्वपति॥ उलूख
लात्॥ॐ प्रति त्वा वर्षवृद्धं वेत्तु॥ परापूतमिति निष्पुनाति॥ॐ परापूतं रक्षः प्र
तिष्ठता अरातयः॥ कृष्णाजिने तुषनिदधानं॥ उरु॰ वायुर्वइति विविनक्ति॥ॐ वा ॥५॥
युर्वो विविनक्तु॥ तुष्णीं पुनः त्रिः कंडनं॥ शूर्पादानं॥ हविरुद्वपनं॥ निष्पवनं॥

तुषनिधानं॥ विवेकीकरणं॥ सर्वंतूष्णीमेव॥ अथाध्वर्युरपहतमिति कृष्णाजिना
तुषनिरस्यत्यूत्करे॥ ॐ अपहतꣳरक्षः॥ उदु॰ देवो वइति पत्न्यामोप्याभिमंत्रय
ते॥ ॐ देवावः सविता॰ पाणिना॥ त्रिःफलीकरोति॥ तूष्णीं शूर्पादानादि विवेकीकर
णांतं फलीकृत्यकणानिदधाति॥ पेषणोपधाने युगपत्॥ पेषणमध्वर्युः करोत्युः
करोत्युपधानमग्नीत्॥ धृष्टिरसीत्युपवेषमादाय॥ ॐ धृष्टिरसि॥ अपाग्न इत्यं
गारान्प्राचः करोति॥ अपाग्ने॰ जहि॰ सेधा॥ आदेवयजमित्यंगारमाहृत्य॥ ॐ
आदेवयजंवह॥ कपालेनावच्छादयति ध्रुवमसीति॥ ॐ ध्रुवमसि पृथिवीं दृꣳह॥
ब्रह्मव॰ वधाय॥ सव्यांगुल्याभ्यन्यं गारं निदधात्यग्ने ब्रह्मेति॥ ॐ अग्ने ब्रह्मगृभ्णीष्व
धरुणमितिपश्चात्॥ ॐ धरुणमस्यंतरिक्षं दृꣳह॥ ब्रह्मवनित्वा॰ वधाय॥ अग्नेब्र॥ पु

+ २ ॐ विश्वाभ्यस्त्वाशाभ्य उपदधामि दिव्यतो बधाय ॥ अग्ने० घ ॥ समं विभज्येद्दक्षिणतः ॥
एवउत्तरतः ॥ चितस्थेति ॥ ॐ चितस्थोर्ध्वचितः ॥ अग्नेष्ट ॥ अधिकं दक्षिणतः ॥ +

॥ दर्शपौ० ॥ रस्ताद्धर्त्रमिति ॥ ॐ धर्त्रमसि दिवं दृꣳह ॥ ब्रह्मव० वधाय ॥ अग्ने० घ्र ॥ विश्वाभ्य इति द
॥ ६ ॥ क्षिणतः ॥ प्रदक्षिणावृत्यात्राकु संस्थ उपधानं ॥ भृगूणामित्यंगारैरभ्यूहति ॥ ॐ भृ
गूणामंगिरसां तपसा तप्यध्वं ॥ प्रणीतोदकमासिच्य ॥ उपसर्जनीरधिश्रयति ॥ कृ
6 ष्णाजिनमादत्ते पूर्ववत् ॥ शर्मासीति कृष्णाजिनादानं ॥ ॐ शर्मासि ॥ अपेत्य पात्रे
भ्यो वधूनोत्यवधूतमिति ॥ ॐ अवधूतꣳ रक्षोवधूताऽअरातयः ॥ उदीचीप० प्र
त्यग्रीवमास्तृणात्यदित्यास्त्वगिति ॥ ॐ अदित्यास्त्व० वेत्तु ॥ सव्याभून्यनिदधात्य
स्मिन्दृषदं धिषणासीति ॥ धिषणासि पर्वते० वेत्तु ॥ पश्चाच्छम्यामुपोहत्य दीचीहि
वदिति ॥ ॐ दिवस्कम्भन्यसि ॥ दृषद्युपलां धिषणासीति ॥ ॐ धिषणासि पर्वते० वे ॥ ६ ॥
त्तु ॥ धान्यमसीति तंडुलानोप्य ॥ ॐ धान्यमसि धिनु० यज्ञन्यं ॥ पिनष्टि प्राणायत्वे

तिप्रतिमंत्रं ॥ ॐ प्राणाय त्वा पिनष्मि ॥ ॐ उदानाय त्वा० ष्मि ॥ व्यानाय त्वा० ष्मि ॥ अर्ध
पिष्टेषु ब्राह्मण आज्य निर्वापो महीनामिति ॥ ॐ महीनाम पयोसि ॥ वेदोसीति यजमानो
वेदबंधं करोति ॥ ॐ वेदोसि तेन० भव ॥ दीर्घामिति कृष्णाजिने प्रोहति ॥ ॐ दीर्घा
मनु प्रसितिमायुषे धां देवो व० पाणिना ॥ चक्षुषे त्वेतीक्षते ॥ ॐ चक्षुषे त्वाइक्षे ॥ पा
त्र्यां सपवित्रायां पिष्टान्यावपति देवस्य त्वेति ॥ ॐ देवस्य त्वा० स्ताभ्यां ॥ संवपामि ॥
श्रपणस्य पश्चादुपविश्य त्वंतर्वेदि वोपसर्जनी रानयत्यन्यः पवित्राभ्यां प्रतिगृह्णाति
समापइति ॥ समाप ॐ ष० पृच्यंतां ॥ संयौति जनयत्यै त्वेति ॥ ॐ जनयत्यै त्वास
यौमि ॥ आलोडनं ॥ समं विभज्य ॥ पिंडीकरणं ॥ पिष्टलेपकरणं ॥ इदमग्नेः ॥ इद
मग्नीषोमयोरितिदेवतानिर्देशः ॥ देवेर्इदमग्नेः ॥ इदमिंद्राग्न्योः ॥ यथादेव

दर्शपौ. देवतमन्यत्॥ इषेत्वेत्याज्यमधिश्रयति॥ ॐ इषेत्वा अधिश्रयामि॥ धर्मोसीति पुरो
॥७॥ डाशौ युगपत्॥ ॐ धर्मोसि विश्वायुः॥२॥ उरु प्रथा इति प्रथयति॥ यावत्कपालम
नति पृथुं॥ ॐ उरु प्रथा उरु प्रथस्वो रुते यज्ञपतिः प्रथतां॥ अग्निष्ट इत्यद्भिरभि
मृशति॥ सकृत्त्रिर्वा॥ अग्निष्टे त्वचं मा हिंसीत्॥२॥ अवदानकरणं॥ पिष्टले
पापनयनं॥ पात्र्यंगुलिप्रक्षालनं॥ पर्यग्निकरोत्यंतरितं रक्षोंतरिता ऽअरात
य इति सहाज्यं॥ ॐ अंतरितं रक्षोंतरिता ऽअरातयः॥ उ२ देवस्त्वेति श्रपणं॥
ॐ देवस्त्वा॰॥ नाके॥ माभेरित्यो रुभते॥ ॐ माभेर्मा संविक्थाः॥२॥ अतमेरुरि
ति भ्रता वर्हिर्वासयति॥ ॐ अतमेरुर्यज्ञो॰ भूयात्॥२॥ भस्मना वेदेनापवेषेण ॥७॥
वा पुरोडाशौ॥ पात्रीमभितप्य प्रत्यग संस्पृष्टमानेन निनयति॥ त्रिताय त्वेति प्रति

प्राचं खननं ॥ प्रत्यंचं निनयनं ॥ ॐ त्रितायत्वा नियैन यामि ॥ इदं त्रिता याप्त्याय नम
म ॥ ॐ द्वितायत्वा निनयामि ॥ इदं द्विता याप्त्याय ॰ ॐ एकताय त्वा निनयामि ॥ इ
दमेकतायाप्त्याय ॰ अन्वाहार्यदक्षिणाग्नावधिश्रयति ॥ अत्र वा व्रतोपायनं ॥ अ
परेणाहवनीयं वेदिं खनति ॥ त्र्यंगुलखातां स्फ्येन दक्षिणतः ॥ व्याममात्रीं पश्चा
चतुरत्नीं त्र्यरत्नीं प्राचीं ॥ अपरमितां वा ॥ प्राक्प्रवणामुदग्वा मध्ये संगृहीतां ॥ अ
ग्निमभितो ॥ ॐ सो ॥ श्रोणीं च ॥ वेदिं परिसमुह्य ॥ त्रितृतीयेऽग्नीदुत्तरत उत्करं करो
ति ॥ अध्वर्युः देवस्य त्वेति स्फ्यमादाय स तृणं ॥ ॐ देवस्य त्वा ॰ हस्ताभ्यामाद
दे ध्वरकृतं देवेभ्यः ॥ सव्ये कृत्वा दक्षिणेनालभ्य जपतीन्द्रस्य बाहुरिति ॥ ॐ
इन्द्रस्य बाहुरसि दक्षिणः ॰ वधः ॥ वेद्यां तृणं निदधात्युदक् पृथिव्यै वर्मासीति ॥

।।दर्श पो ०।। ॐ पृथिव्यै वर्मासि।। पृथिविं देवयजनीति लृणं नहि हि तं प्रहरति।।ॐ पृथिविं देवयजन्योष
।।१९।। ध्या ० क्षिषं।।व्रजं गच्छेति पुरीषमादत्ते।।ॐ व्रजं गच्छ गोष्ठानं।। वर्षतु त इति वेदिं प्रेक्षते।।
ॐ वर्षतु ते द्यौः।।बधान स्तु स्करे करोति।।ॐ बधान देव सवितः परमां मौक।।अपाररुमिति
8 द्वितीयं प्रहरणादि।।ॐ अपाररुं ० यजनात्।।उद्द ० व्रजं गच्छेति पुरीषमादत्ते।।ॐ व्रजं
गच्छ गोष्ठानं।।वर्षतु त इति वेदिं प्रेक्षते।।ॐ वर्षतु ते द्यौः।।बधाने स्तं स्करे करोति।।ॐ ब
धान देव ० पाशैः।।यो ० मामौक।।आग्नीध्रेणाभिमृश्य स्तं स्करे करोत्यररोदिवमिति।।ॐ
अररो दिवं मा पप्तः।।उद्द ० द्र प्स स्त इति तृतीयं प्रहरणादि।।ॐ द्रप्सस्ते द्यां मा स्कन्।।व्रजं
गच्छेति पुरीषमादत्ते।।ॐ व्रजं गच्छ गोष्ठानं।। वर्षतु त इति वेदिं प्रेक्षते।।ॐ वर्षतु ते द्यौः।। ।।२०।।
बधाने स्तं स्करे करोति।।ॐ बधान देव ० मौ मौक।। तुर्धैरा च तुर्थं।।सतृणं पुरीषादानं।।

सूमी

वेदिप्रेक्षणं॥उत्करे करणं॥ब्रह्मन्नुर्वेपरिग्राहं परिग्रहीष्यामि॥ॐ बृहस्पते परिगृहाण
वेदिꣳस्यगावो देवाः सदनानि संत्वस्यां बर्हिः प्रथतांꣳ साध्वंतर्हिꣳ स्त्वा पृथिवीं देवीं दिव्य
स्तु देवतावर्धयत्वं॰धेहि॥ॐ परिगृहाण॥ॐ गायत्रेण त्वाछंदसा॰मि॥ स्फ्येन दक्षिणतः
ॐ त्रैष्टुभेन त्वा॰मि॥ पश्चिमतः॥ जागतेन त्वा॰मि॥ उत्तरतः॥ वेद्यां त्रिरुल्लिख्याहरति
॥हत्वाग्नीध्रे स्वाः समृशति॥ॐषधीनां मुलान्युच्छेत्तवे ब्रूयात्॥अग्निणारवनत्यध्वर्युः
॥ब्रह्मन् उत्तरं परिग्राहं परिग्रहीष्यामि॥ॐ बृहस्पते परि॰धेहि॥ॐ परिगृहाण॥ॐ सु
क्ष्मा चासि शिवा चासि॥ दक्षिणतः॥ स्योना चासि॰ पश्चिमतः॥ ऊर्जस्वती॰ उत्तरतः॥
पुराक्रूरस्य त्वनुमार्ष्टि॥ॐ पुराक्रूरस्य॰यजंते॥ अध्याधिवेदिं प्रोक्षणीर्धारयत्यन्यो
थ स्फ्यमुद्यंम्याह॥ प्रोक्षणीरासादय॥ इध्मा बर्हिरुपसादय॥ स्रुचः संमृड्ढि॥ पत्नीं

अनिशितोसि

सन्नह्याज्य मोदेहि ॥ विद्यां प्रोक्षणीर्निदधाति ॥ द्विषतो वध इति स्फ्यमुदं चं प्रहरति ॥ ॐ
॥दर्शपौ०॥ ॥१०॥ द्विषतो वधोसि ॥ अवनिर्ज्यपाणी ॥ अपरेण प्रणीता स्फ्यं निदधाति ॥ तस्मिन्निदधाती
ध्मा बर्हिश्च ॥ विदाग्रमपच्छिद्य ॥ स्रुवं प्रतप्य पूर्ववत् ॥ ॐ प्रत्युष्टं रक्षः प्रत्युष्टा ऽअरा
१ तयः ॥ उदको० वेदाग्रैरंतरतः प्राक् संमार्ष्ट्य निशित इति ॥ ॐ अनिशितोसि० संमा
र्ग्मि ॥ विपर्यस्य बहिर्मूलैः ॥ प्राङ् उत्क्रम्य प्रतप्य प्रतप्य प्रयच्छति ॥ प्रत्युष्टं रक्षः प्र स्कः
ष्टा ऽअरातयः ॥ उद० अनिशित निस्रुचः ॥ ॐ अनिशितोसि० नीवा० मार्ग्मि ॥ तूष्णीं प्रा
शित्रहरणे ॥ श्रृतावदानं ॥ पुरोडाशपात्र्यौ च ॥ शब्दादिडापात्री ॥ संमार्जनान्यपा
स्यत्वाहवनीये प्रासनमेके ॥ संमार्जनानामुत्करे ॥ ध ॥ पत्नीं सन्नह्यति प्रत्यग्द ॥१०॥
क्षिणत उपविष्टां ॥ गार्हपत्यस्य मुंजयोक्त्रेण त्रिरंतापरिहरत्यधीवासो दिसेरा

ह्लेति॥ॐ अदित्यैरास्नासी० हनं॥दक्षिणं पात्रामुत्तरे प्रतिमुच्योर्ध्व मुग्र् हतिविष्णो
र्वैष्ण्यइति॥ॐ विष्णोर्वैष्णोसि०॥नग्नथिं करोति॥ऊर्जे त्वेत्याज्यस्य मुद्वास्य॥ॐ ऊ
र्जे त्वा॥उद्वासयामि॥पत्न्याज्यमवेक्ष्यसदब्धेनेति॥पत्न्याज्यमवेक्षस्व॥ॐ अ
दब्धेन त्वा चक्षुषावपश्यामि॥अग्नेर्जि० यजुषेयजुषे॥वेद्यां करोत्यपरं प्रोक्षणी
भ्यः॥सवितुस्त्वेत्याज्यमुत्पुनाति पवित्राभ्यां॥ॐ सवितुस्त्वा० रश्मिभिः॥प्रोक्षणी
श्च पूर्ववत्॥सवितुर्वइति॥ॐ सवितुर्वः प्र० रश्मिभिः॥आज्यमवेक्षेत तेजोसीति
यजमानो वा॥ॐ तेजोसिशुक्रमस्यमृतमसि॥स्रुवेणाज्यग्रहणम्॥चतुर्जुह्वां धाम
नामेति॥ॐ धामनामासिप्रियं० देवयजनं॥सकृन्मंत्रेण त्रिस्तूष्णीं॥अष्टावुपभृत्य
ल्पीयो नुयाजाश्चेत्॥ध्रुवायां चतुर्जुहूवत्॥स्थाल्यपसरणं॥इध्मं प्रोक्षति विस्रस्य

॥दर्शपौ०॥
॥१०॥
वेदिंच॥ कृष्णोसीति प्रतिमंत्रं॥ इध्मं विस्त्रंसनं॥ ब्रह्मन् इध्मं प्रोक्षिष्यामि॥ ॐ प्रोक्षयज्ञ०
ॐ प्रोक्ष॥ ॐ कृष्णोस्याखरेष्ठोग्नये त्वा जुष्टं प्रोक्षामि॥ इध्मं प्रोक्षामि॥ वेदिंच०॥ ॐ
वेदिरसि बर्हिषे त्वा जुष्टां प्रोक्षामि॥ आग्नीध्रात् बर्हिः प्रतिगृह्य वेद्यां कृत्वा पुरस्ताद्ग्रं
थिं कृत्वा॥ ॐ ब्रह्मन् बर्हिः प्रोक्षिष्यामि॥ ॐ प्रोक्षयज्ञं० ॐ प्रोक्ष०॥ बर्हिरसीति॥
ॐ बर्हिरसि० शेषं मूले घूपासिंचत्यदित्यै व्यंदनमिति॥ ॐ अदित्यै व्यंदनमसि॥
पवित्रे निधाय प्रणीतासु॥ बर्हिर्विस्त्रंस्य॥ पुरस्तात्प्रस्तरग्रहणं॥ विष्णोरिति॥ ॐ
विष्णोः स्तूपोसि॥ तूष्णीं ब्रह्मणे प्रदाय॥ बर्हिः सन्नहनं विस्त्रंस्य दक्षिणस्यां वे ॥१०॥
दिश्रोणौ निधाय॥ अन्ये रवछाद्य॥ आपन्तं स्तृणं निरस्येत्॥ बर्हिस्त्रेधा भागं
विभज्य॥ वेदिं स्तृणात्पूर्णं भ्रदसमिति॥ ॐ ऊर्णम्रदसं त्वा० स्यां० त्रिवृत्परिस्तरणं॥

इध्मात्समिधमादाय॥ब्रह्मणः प्रस्तरं वादायाहवनीयं कल्पयत्सुपर्युपरि प्रस्तरं
धारयन्॥उल्मुकेउदूहति॥अनुयाजाश्चेत्॥७॥परिधीन्परिदधात्यार्द्रान्नेकचूर्णी
यान्बाहुमात्रान्पालाशांबैकंकतकार्ष्मर्यबैल्वान्पूर्वालाभेपूर्वालाभउत्तरान्
खादिरोदुंबरान्वामध्यमदक्षिणोत्तरान्गंधर्वइतिप्रतिमंत्रं॥ॐ गंधर्वस्त्वा
वि० इक्लितः॥ॐ इंद्रस्यबाहु० क्लितः॥ॐ मित्रावरुणौत्वो० ईक्लितः॥प्रथमंप
रिधिं समिधोपस्पृश्य॥वीतिहोत्रमित्यादधाति॥वीतिहोत्रंत्वाकवे० ध्वरे॥अ
नुपस्पृश्यद्वितीयां समिदसीति॥ॐ समिदसि॥सूर्यस्त्वेतिजपत्याहवनीमीक्षमा
णः॥ॐ सूर्यस्त्वापुरस्ता० न्नास्यै॥आघ्रस्य वेदिं वर्हिषस्तृणतिरश्चीनिदधातिसवि
तुरिति॥ॐ सवितुर्बाहूस्थः॥तयोः प्रस्तरं स्तृणामूर्णम्रदसमिति॥ॐ ऊर्णम्र

॥दर्शपौ०॥ दसंत्वास्थंत्वा० देवभ्यः ॥अभिनिर्धाय्यात्वावसवइति॥ॐ आत्वावसवोरुद्राऽआदित्याः

॥१३॥ सदंतु॥सव्याश्रून्येजहूं प्रतिगृह्यनिदधातिघृताच्यसीति॥ॐ घृताच्यसिजुहू० सीद॥

इतरांश्ववेदोपयहेर्ण॥घृताच्यस्कपभृन्नामेति॥घृताच्यस्कपभृ० सीद॥घृताच्य

सिध्रुवानाम्नेति॥ॐ घृताच्यस्कषसिध्रुवा० सीद॥स्थाल्याः प्रोत्सारणं गार्हपत्या

न्तरे॥एतयपुरोडाशयोर्विभस्मीकरणं॥पुरोडाशपात्र्योः स्थापनं॥तयोरुपस्तारः

तत्रास्थाभिघारः॥उद्वासनं॥अनुद्वासितानांतुपूर्वेण॥उद्वासितानामपरेण॥क

पालसंख्याप्राणदानं॥ॐ यस्तेप्राणः पशुषुप्रविष्टोदेवानांविष्ठामनुयोविस्थे॥आ

त्सन्वासोमघृतवान्हिभूत्वाग्निंगच्छस्वर्यजमानायविंद॥ओंयस्तेप्राणः० भूत्वा ॥ ॥

ग्नीषोमौगच्छ० विंद॥दर्शेभूत्वेंद्राग्नीगच्छ० विंद॥यथादैवतमन्यत्र॥प्रत्यन

न्हि कपालानि॥ यानि घर्मे कपालान्युपचिन्वंति वेधसः॥ पूष्णस्तान्यपिव्रत इंद्रवायुविमुंच
तामिति॥ तूष्णींवा॥ सरमायोब्दसयति॥ प्रथममुद्वासयामि॥ द्वितीया॥ दीनि॥ प्रियेण
धाम्नेति हवींऽषि वेद्यांकृत्वा स्थालीपूर्वकं॥ ॐ प्रियेण धाम्ना प्रियं सदसि सीद॥ ध्रुवा
अ सेदन्निति सर्वाण्यालभते स्थालीपूर्वकं॥ ॐ ध्रुवा असद०॥ पाहि॥ पाहि यज्ञं पाहि
यज्ञपतिं॥ पाहि मामित्यात्मानमालभते॥ ॐ पाहि मां यज्ञन्यं॥ उद०॥ अग्रया व्रतोपायनं
अंतरेणापराग्नीगत्वा परेणाहवनीयं प्राङ्तिष्ठन्नग्नीमीक्षमाणो पउपस्थस्य॥ व्रतमु
पेत्यग्ने व्रतपत इति॥ ॐ अग्ने व्रतपते०॥ राध्यतां॥ ८॥ होतृषदनं कृत्वा उपरेण वेदिं
श्रोणिवेदंतरेण॥ होतरेहि॥ होत्रं करिष्यन्संचरेण प्रविश्य॥ अध्वर्युरिध्मात्समिध
मादाय॥ अग्नये समिध्यमानायानुब्रूहि॥ होताऽपरेणाहवनीयं प्राङ्तिष्ठन्॥ अध्व

।१ दर्शपौ० ।१ यु॑प्रेषितो ब्रह्मन्त्सामिधेनीरनुवक्ष्यामि ॥ प्रजापते॑र्ब्रह्मानु ब्रूहि ॥ यज्ञं देवतां वर्धय त्वेतिपूर्व
॥१।२॥ वत् ॥ ॐ अनु ब्रूहि ॥ ब्रह्मप्रसूतो गुलिपर्वाग्रमा॒ऽस॰ भूर्भुवस्वः सर्वं प्रपद्ये ॥ यजमानोध्व
र्युद्दत्तं स्फ्यमादाय ॥ संतन्वं निवमेनु ब्रूहि ॥ इतिहोतारं प्रेष्य ॥ इद महं पंचदशेन वज्रेण
भ्रातृव्यमववाधे ॥ इति स्फ्योपग्रहेणपादांगुष्ठाभ्यां भूमिं संपीड्य ॥ उद॰ ततो त्रिर्हिंकृ
त्वोपांशु महाव्याहृतीशं पूर्वाः सामिधेनीः प्रणवे नार्धर्चेशः ॥ संदध्यादन्यत्राप्यर्धर्च
वत्त्रेयत् ॥ प्रतिप्रणवमाधानं ऽ समिद्ध इति प्रागन्तेः सर्वमिध्ममेकं वर्जमनुयाजार्थे तु ॥
अध्वर्यो राहवनीये ॥ हिं हिं हिं ॥ भूर्भुवः स्वरों प्रवो वाजा॰ यो म ॥ प्रथमोत्तमौ सामिधेन्यौ
अनवानं पठित्वा प्रणवेन संदधाति ॥ अग्न आयाहि वीतये गृणानो हव्यदातये॰ हव्यवाह ॥१।२॥
नो ॥ अग्ने महां असि ब्राह्मणभारत ॥ काश्यपावत्सार नैध्रुव ॥ देवेद्धोमन्विद्ध॰ नाम जमानाय

इति संतन्वंनिवमेब्रूयात् ॥ पंचदशानिविदः संपादयन् ॥ यथादेवता ॥ अग्निमग्नउ आवह ॥ सोममावह ॥ अग्निमावह ॥ उपां० अग्नीषोमौ ॥ उच्चैः ॥ आवह ॥ अग्नीषामावावह ॥ दर्शे उपां० ॥ विष्णुं उच्चैः ॥ आवह ॥ इंद्राग्नी आवह ॥ देवां आज्यपां आवह ॥ अग्निं होत्राया० ॥ मावह ॥ आ च वह जातवेदः सुयजा च यज ॥ अनुवचनांते वेदेनाहवनीयं त्रिरुपवाज्य स्रुवेण पूर्वमाघारमाघार्य ॥ मनसा प्रांचं संततं ऋजुं दीर्घं जुहोति ॥ ओं प्रजापतये स्वाहा० इदं प्रजा० न मम ॥ अध्वर्युः ॥ अग्निमग्नीत्संमृड्ढि ॥ अग्नीदिध्मसंन्नहनैरनुपारिधि ॥ संमाड्ढ्यग्ने वाजजिदिति ॥ त्रिस्त्रिः परिक्राम न्सकृन्मंत्रेद्विस्तूष्णीं ॥ ओं अग्ने वाजजिद्वाजं त्वा सरिष्यंतं वाजजितं संमार्ज्मि ॥ तूष्णीमुपरि ॥ अपरमाहवनीयादंजलिं करोति ॥ नमो देवेभ्यः प्राची ॥ स्वधा पितृभ्यः दक्षिणतउदीच्या तः पश्चादुत्तरतश्च २

११दर्शपौ॰ त्तानं ॥ अपउपस्तृणीय ॥ सुयमेमइति जुहूपभृतावाद्यायोर्त्तरां जुहूं कृत्वा ॥ ॐ सुयमे मेभू
११२३॥ यास्तमस्कन्नमद्याज्यं देवेभ्यः संभ्रियासं ॥ सव्येनपादेनदक्षिणातिक्रामति ॥ ॐ विष्णो
र्वाविष्णुर्विति ॥ ॐ अग्निर्णाविष्णोमात्वावक्रमिषं ॥ वसुमतीमित्यवस्थाय ॥ ॐ वसु
मतीमग्नेतेच्छायामुपस्थेषंविष्णोःस्थानमसि ॥१॥ इतइंद्रइतिजुहोत्युत्तरार्धारं ॥ इत
इंद्रोवीर्यमकृणोदूर्ध्वोध्वरऽआस्थातु ॥ अग्नेवैगेनवेहोत्रं वेर्दूत्यं ॥ अवतांत्वाद्यावापृथि
वीअवत्वंद्यावापृथिवी ॥ स्विष्टकृद्देवेभ्यइंद्रऽआज्येनहविषाभूत्स्वाहा ॥ इदमिंद्रा
यनमम ॥ असंस्पर्शयन्स्रुचावेत्युजुह्वोभृवाऽ समनक्ति संज्योतिषेति ॥ संज्यो
तिषाज्योतिर्गच्छतामिति ॥ यथास्थानंनिधायस्रुचो ॥ अग्नीधमाश्रावयतिओश्राव
यस्फ्यमुद्यम्याग्नीत्प्रत्याश्रावयतिअस्तुश्रौषट् ॥ एवंसर्वत्र ॥२॥१

११२३॥

इतरां वेदोपग्रहेण ॥ इध्मसन्नहनान्याहाय वेदिं बर्हिराक्रम्याहवनीयस्योत्तरतस्थित्वा ॥ ॐ श्रावय ॥ अस्तु श्रौषट् ॥ अग्निर्देवोद्दै । व्योहोतादेवान्यक्षद्विद्वांश्चिकित्वान्मनुष्वत् ॥ भरतवत् ॥ आंगिरसवत् ॥ बार्हस्पत्यवत् ॥ भारद्वाजवत् ॥ ब्रह्मण्वदा च वक्ष ब्राह्मणा अस्य यज्ञस्य प्राविताऽरः ॥ उपांशु ॥ असौ अमुकशर्मा होता उच्चैः मानुषः ॥ होता एतत्वा देव सवितार्वृणत ॰ इतिदि ॥ यजमान ॰ यज्ञियान् ॥ अग्निर्होतो[illegible]वेति स्रुगादापनं ॥ अध्वर्युः ॥ होतरिअग्निर्होतेत्युक्त्वा जुहू मादायोपभृत्यधिनिधानं ॥ घृतवतीमित्युक्ते अध्वर्युः ॥ स्रुचावादयातिक्रम्य ॥ यजति स्थानेध्रुवस्तिष्ठं नाश्रावयेत् ॥ स्फ्य सन्नहनान्याहायोत्तरं देशे प्राङ्मुखो दक्षिणामुखो वा तिष्ठन्नग्नीत्प्रत्याश्रावयेत् ॥ ~~स्फ्यं सन्नहनान्याहायोत्तरं देशे प्राङ्मुखो दक्षि~~

श्री अथ पंच प्रयाजाः ॥ ॐ श्रावयेम अस्तु श्रौषट् ॥ समिधो यज ॥ ये य जा महे समिधः

॥दर्शपौ॰॥ समिधोअग्नआज्यस्यव्यंतुवौषट्॥इदंसमिद्भ्यो नमम॥२॥एकोममएकातस्ययो
॥१४॥ स्मांद्वेष्टियंचवयंद्विष्मः॥भूयात्‌त्विषिमा न्भूयासं॥वषट्कारमामआयु॰ वागोजः सहो
जो॰ पात॰ गिवा॰ आत्मानमालभेत॥उद॰ गंद्विनीयांद्विनीयंतृतीयसर्वंतृतीये॥ॐ
श्रावय॥अस्तुश्रौषट्॥यज॥ये॰ यजामहे तनूनपा॰ वेतुवौषट्॥इदंतनूनपातेनमम॥द्वौम
मद्वेतस्ययोस्मांद्वेष्टियंचवयंद्विष्मः॥भूयास्तां॥अपचितिमान्भूयासं॥ॐश्रावय॥
अस्तुवौषट्॥यज॥येयजामहइड्भ्यो अग्न॰ व्यंतुवौषट्॥इदमिड्भ्योनमम॥त्रयो
स्त ममतिस्रस्तस्ययो॰ ष्मः॥भूयासुः॥यशस्वीभूयासं॥चतुर्थी समानयनंबर्हिषि॥
ॐश्रावय॥अस्तुश्रौषट्॥यज॥येयजामहेबर्हि॰ वेतुवौषट्॥इदंबर्हिषेनमम॥
चत्वारोममचतस्रस्तस्ययोस्मांद्वेष्टि॰ ष्मः॥भूयासुः॥ब्रह्मवर्चसीभूयासं॥ॐश्रावय

॥अस्तु श्रौषट्॥यज॥येयजामहे स्वाहाग्निं स्वाहा सोमं स्वाहाग्निं स्वाहा॥उपां॰अ
ग्नीषोमौ॥उच्चैः॥स्वाहाग्नीषोमौ स्वाहा देवा आज्यपा जुषाणा अग्न आज्यस्य व्यंतु वौषट्॥
इदमग्नये सोमायाग्नये अग्नीषोमाभ्यां अग्नीषोमाभ्यां देवेभ्य आज्यपेभ्योग्नये स्विष्टकृते
न चनमम॥पंचममंतस्यैका च न मे॰ष्मः॥भूयासुः॥अन्नादो भूयासं॥दर्शे॥येयजामहे॰स्वा
हाग्निरित्यादि॰अग्निं स्वाहा उपां॰विष्णुं॰उच्चैः॥स्वाहेन्द्राग्नी स्वाहा दे॰इदमग्नये सोमाय
मग्नये विष्णवे इंद्राग्निभ्यां देवेभ्य आज्यपेभ्योग्नये स्विष्टकृते चन मम॥पंचममनंतस्यैका॰
द्विष्मः॥भूयासुः॥अन्नादो भूयासं॥एत्स्रुत्वाभिघारणं॥ध्रुवायाः॥हविषः॥हविषः
उपभृतश्च॥आज्यभागाभ्यां चरेति॥अध्वर्युः॥अग्नयेनुब्रूहि॥होतार्विलंबिता॥अग्नि
र्वृत्राणि॰शुक्र आहुतो॰॥दर्शे॥अग्निः प्रत्ने॰वृधो॥ध्रुवायाः॥प्रथमस्तुष्णी॥आप्याय

अस्तुश्रौषट्॥२

॥दर्शपौ०॥ तो० यज्ञे अस्मिन्॥इति ध्रुवायाः॥अभिघारयत्यवदायावदाय॥अस्तुश्रौषट्॥उत्थाया
॥१५॥ तिक्रम्याश्राव्याह॥ॐ श्रौ३षट्॥अग्निं यज॥ये यजामहे ग्निं जुषाणो अग्निराज्यस्य वेत्वौ२
षट्॥इदमग्नये न मम॥आग्नेयमुत्तरपूर्वार्द्धे॥एवं दक्षिणपूर्वार्द्धे सौम्यं॥सोमायानु
15 ब्रूहि॥होतात्वं सोमा सिक्रतो २ दर्शोसोम गीर्भि० विशो॥पूर्ववदाज्यं गृहीत्वा॥आप्या०
स्मिन्॥४॥ॐ श्रावय॥अस्तु श्रौषट्॥सोमं यज॥ये यजामहे सोमं जुषाणः० हवि
षो वेत्वौषट्॥इदं सोमाय न मम॥अथ प्रधानयागः॥हविर्भ्यो च॥अग्नये नु ब्रूहि॥
अग्निर्मूर्द्धा दिव० जिन्वतो॥स्थालीतो जुह्वामुपस्तीर्य॥आग्नेयपुरोडाशात्॥म
ध्यात्पूर्वार्द्धो द्विरवदानग्रहणं॥प्रस्तु पस्तारः॥स्वताभ्यंगः॥यजति स्थानानति ॥१५॥
क्रमणं॥ॐ श्रावय॥अस्तु श्रौषट्॥अग्निं यज॥ये यजामहे ग्नि भुवो यज्ञस्य०॥

हव्यवाहं वौषट्॥ इदमग्नये नमम॥ प्रयाग त्य॥ उपां॰ अग्निषोमाभ्यां॰ उच्चैः अनूब्रूहि
उपांशु॥ अग्नीषोमाविम ँ॰ हशु षेमय॥ उच्चैः॥ ॐ॥ दर्व्वी॥ उपां॰ विष्णवेअनुब्रू
हि॥ उच्चैः॥ उपां॰ इदंविष्णुर्विचक्रमे॰॥ स्रुवे॥ ॐमित्युच्चैः॥ ध्रुवायाः॥ प्रथमः॥ ॐ
आप्यायता॰ अस्मिन्॥ २॥ ३॥ ४॥ पंचमेनिक्षिपेध्रुवायाः॥ अतिक्रम्याश्राव्याह॥
ॐश्रा॰ अस्तु॰ उ॰ अग्नीषोमोउच्चैः॥ यज॥ येयजामहे॰ उपांशु॥ अग्नीषोमोजु
उ॰ वौ॰ षाणावग्नीषोमावाज्यस्यवीतां॰॥ इदमग्नीषोमाभ्यांनमम॥ दर्व्वी॥ विष्णुंयज॥ ये
यजामहे॰॥ उपां॰ विष्णुं॥ प्रतद्विष्णु॰ विश्ववौषट्॥ इदंविष्णवे॰ उच्चैः॥ अग्नीषो
माभ्यामनुब्रूहि॥ अग्नीषोमासवेदसासहूतीवनतंगिरः॥ संदेवत्राबभूवथो
॥ ३॥ दर्व्वी॥ इंद्राग्निभ्यामनुब्रूहि॥ इंद्राग्नीअवसागतमस्मभ्यंचर्षणीसहा॥

॥दर्शपौ॰११ मनोदुराः सदन्तां ॥ स्थालीतोजुह्वामुपस्तीर्य ॥ मध्यात्पूर्वार्द्धाद्द्विरवदानग्रहणं ॥
॥१६॥ प्रत्क्पस्तारः ॥ क्षताभ्यंगः ॥ यजतिस्थानातिक्रमणं ॥ ॐ श्रा॰ अस्तु॰ षट् ॥ अग्नीषो
मो यज ॥ ये॰ हेग्नी षोमो युवमेतानि दिवि रो॰ गृभीतां वौषट् ॥ इदमग्नीषोमाभ्यां न
16 मम ॥ दर्शे ॥ इंद्राग्नीयज ॥ ये॰ हइंद्राग्नीगीर्भि॰ धेस्तां वौषट् ॥ इदमिंद्राग्निभ्यां नमम
॥ अग्नयेस्विष्टकृतेनुब्रूहि ॥ प्रेद्धो अग्ने॰ वाजो ३ ॥ दर्शे ॥ पिप्रीहि देवां ३ उ॰ यजि
ष्ठों ३ ॥ स्थालीतोजुह्वामुपस्तीर्य ॥ यावद्द्विरुत्तरार्द्धाद्वदाय ॥ पात्रांतरेणजु
ह्वांप्रक्षिप्य ॥ द्विरभिघार्य ॥ नक्षताभ्यंगः ॥ यजतिस्थानातिक्रमणं ॥ ॐ श्रावय ॥१६॥
अस्तु श्रौषट् ॥ अग्निं स्विष्टकृतं यज ॥ ये यजामहेग्निं स्विष्ट॰ उपांशु ॥ अग्नीषो
षोमयोः॰ ॥ प्रियाधामान्ययाड् देवानामाज्यपानामित्यादि ॥ दर्शे ॥ न्ययाट् ॥ विशेः

प्रियाङ्किं द्वाग्न्याः ॰देवानामाज्यपानामित्यादि ॥ व्यन्तू वौषट् ॥ इदमग्नये स्विष्टकृते ॰॥ उ
त्तराईं ॥ जुहोत्यसंसृष्टामाकुतिर्जुहोति ॥ निधाय स्रुचौ ॥ इत रं वेदोपयहेण ॥ सर्वेभ
प्तउपस्पृश्य ॥ संचरमप्युष्य ॥ प्राशित्रमवद्यति ॥ यवमात्रं पिप्पलमात्रं वा अन्यत्रेभ रत
ज्यमुभयतो वाग्नेयाद्भागं श्वाध्वर्युः संचरेण ॥ ब्रह्मणे प्रदाय पूर्ववेणिके ॥ अपोपस्पृश्य
मित्रस्यत्वेति निप्राशित्रं प्रतीक्षते ॥ ॐ मित्रस्यत्वा चक्षुषा प्रतीक्षे ॥ देवस्यत्वेति प्रति
गृह्णाति ॥ ॐ देवस्यत्वा॰ स्ताभ्यां ॥ प्रतिगृह्णामि ॥ पृथिव्यास्त्वेति सादयत्युपोह्य बर्हि
षि ॥ ॐ पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थे ॥ पुनरादायदेवस्यत्वेति ॥ ॐ
देवस्य॰ हस्ताभ्यां आददे ॥ अनामिकांगुष्ठाभ्यामग्नेष्ट्वेति प्राश्नाति दंते रनुपस्पृश्या
न ॥ ॐ अग्नेष्ट्वास्ये॰ मुखेन ॥ अत्र चेन्निदधाति वा संसेदृशो ॥ प्रणीतोदकेन उत्करे सो ॥

॥स्रुचौ॥ ॥प्रक्षाल्यपात्रेनाग्निमालभेत॥स्वासनेउपविश्य॥याअप्स्वंतर्देवता॰जठरेसादयामि
॥२७॥ ॥अध्वर्युःप्राशित्रसमर्पणांते॥अपउप॰इडांपंचावत्तांकरोति॥उपस्तीर्यदक्षिण
तोमध्याच्च॥यावद्धविः॥स्विष्टकृद्वदाज्यं॥आग्नेयात्॥उभौवा॥यजमानभागंपूर्वा
17 र्द्धो॥दीर्घप्राशीयंपुरस्तात्प्रवायाःकरोति॥आग्नीध्रभागंषडवत्तं॥आग्नेयस्योपरस्य ब्रह्मभागं ध्रुवायां४
चतुर्धाकरणं॥द्विदैवत्यवत्कृदैवत्यानां॥चतुर्धाकरणाभावः॥अग्नीषोमीयस्यस
र्वमिडायांनिदधाति॥इडांहोत्रेप्रदायाविसृजन् दक्षिणातिक्रामति॥इडांप्रति
गृह्यऐळेनाज्येनहोतुरंगुलिपर्वणीअनक्ति॥होताओष्ठयोर्निलिंपेदधरमध
रेणोत्तरमुत्तरेण॥मनसस्पतिनातेकृतस्याभ्नामिषेप्राणाय॥वाचस्पतिनाते ॥५७॥
कृतस्याभ्नाम्यूर्जउदानाय॥अवजिघ्रत्येके॥उप॰अवांतरेडामादधाति॥पाणि

तस्मै पूर्ववद्दिद्धांच॥ प्र॰ हि॰ नृ॰ च॰ स्वयमेवपठेत्॥ इडांचप्रतिगृह्यांगुलिभिरप्रसारि
ताभिर्मुष्टिकृताभिः मुखमात्रे धारयन्॥ उपं॰॥ सर्वेन्वारभंते॥ उपहूतं रथंतरं
सहपृथिव्योपमां इडोपहूते त्यृच्चमनि ओंन्नियत्र हिंषदं करोति॥ अघ्नपिन्व
स्वायुर्मेधुक्ष्वप्रजां मेधुक्ष्व पशून्मेधुक्ष्व ब्रह्ममेधुक्ष्व क्षत्रंमे धुक्ष्व विशोमेधुक्ष्व
यास्मान्द्वेष्टियंचवयंद्विष्मः॥ तस्यप्रजायापशुभिरायुषायस्वतं चतुर्द्धाकृत्वा॥ प्र्या
बर्हिषीऋत्विग्भ्यः आदिशति॥ इदं ब्रह्मणः॥ इदं होतुः २ इदमध्वर्योः ३ इद
मग्नीध्रः॥४॥ प्राग्दक्षिणतः पश्चिमोत्तरानेकैकंतान्॥ अत्रपितरइतियजमानो
जपति॥ अपसव्यं ॐ अत्रपितरोमादयध्वं॰ वृषायध्वं॥ सव्यं॥ विसृज्याभिमदं
नेति॥ ॐ अमीमदंत॰ षत॥ सव्यं॥ उदकोपस्पर्शः॥ एकैकमाहरति॥ इदं ब्रह्मणे

हर्यपो । इदं होत्रे ॥ इदमध्वर्यवे ॥ इदमग्नीध्रे ॥ मानवी घृतपद्युत्र ० नुपहूतः ॥ द्यावापृथि
॥२॥ वीस्यन्त्यमाने आग्नीध्रे षडवत्तं प्रयच्छति ॥ मयीदमिति यजमानो जपति ॥ ॐम
यीदमि ० ञ्जिष ॥ उपहूतां प्राश्नन्ति युक्त्वा यजमानश्च ॥ आग्नीध्रः षडवत्तं प्राश्नाति
उपहूता पृथिवी मातोप मां ० स्वाहा ॥ द्वितीयभागं ॥ उपहूतो द्यौ ० स्वाहा ॥ अवांतरे
डा होतारपारस्य ॥ स्वंस्वं भागं सर्वे प्राश्नाति ॥ आचान्ते मार्जयन्ते परेण वेदिं सुमित्रि
यान इति स्फ्योपग्रहः ॥ ॐ सुमित्रिया न ० संतु ॥ ४ ॥ यजमानस्य प्राणापानौ पातं सि
निपवित्रे प्रस्तरे करोति ॥ यजमानस्य प्राणापानौ पातं ॥ तूष्णीं वात्र वाग्रह्म प्राश्ना ॥ ८ ॥
ति भागमस्मै परिहरति यजमान भागं चा प्रोषिते ॥ ब्रह्मभागं ब्रह्मणे ॥ यजमान
भागं यजमानाय ॥ अन्वाहार्यमभिघार्य उदकु उद्वास्यां नरा ब्रह्मयजमानो हवा

वेद्यां निधाय ॥ आलभते ॥ ॐ प्रजापतेर्भागो० लोकइहच ॥ अस्याः इष्टेः समृध्यर्थं अ
यमन्वाहार्यो दक्षिणा ॥ ब्रह्मादि ऋत्विग्भ्यः स्वांशेन प्रतिगृह्य तां ब्राह्मणस्तत्विभागः
प्रतिगृह्य तां ग्राहातर्यस्तेवि भागः सं० ॥ सं० अध्वर्युस्ते वि० सं० अग्नीध्रस्ते वि० संद्यौस्त्वा ददातु पृथिवी त्वा प्रतिगृण्हातु ॥ सा दक्षि
णा उदगुद्वासयति हविश्च । सम स्वा स्त्रुके समिधमादायाह ॥ ब्रह्मन्प्रस्थास्यामि समिध
मादायाग्निमग्नी त्संमृड्ढि ॥ ब्रह्मा ॥ एतन्ते देव० प्रतिष्ठ ॥ आग्नीध्रस्तिष्ठन् आहवनीये स
मिधमादधाति ॥ एषा त इति होतानुमंत्रयते ॥ ॐ एषा ते० संमार्ष्टि पूर्ववत् अपरिक्रामन्
सकृत्सकृत्सस्रवाः समिति ॥ ॐ अग्ने वाजजि० स० तूष्णीमुपरि भ्रह्मानुज्ञातोनुयाजैः
त्रिभिश्चरति ॥ औपभृतं समानीय अतिक्रम्याश्राव्याह ॥ ॐ श्रावय ॥ अस्तु श्रौषट् ॥
देवान्यज ॥ देवं बर्हिः वेदू ३ वो० इदं देवाय बर्हिषे न मम ॥ ॐ श्रावय । अस्तु० षट् ॥ देवान्य०

।दर्शपौ०। देवो नराशंसः सो० वेतु वौषट् ॥ इदं देवाय नराशंसाय न मम ॥ ॐ आवय अस्तु० ट् देवां० देवो
॥१९॥ अग्निः स्विष्ट० वीही वौषट् ॥ इदं देवायाग्नये स्विष्ट० उपविश्य उपभृतं समानीय दक्षिणं जा
न्वाच्य जुहोति ॥ ॐ देवेभ्यः स्वाहा इदं देवेभ्यो न मम ॥ आंचाधारानुयाजं हुत्वा ॥ यथास्थानं
19 निधाय स्रुचौ व्यूहति० अग्नेरग्नीषोमयोरग्नीषोमयोरुज्जितिमनूज्जयत्वयं यजमानो वा
जस्यैनं प्रसवेन प्रोहामि दक्षिणेन पाणिना जुहूं प्राचीं प्रेरयति ॥ अग्निरग्नीषोमाव ग्नीषो
मो तमपनुदंतु यमयं यजमानो द्वेष्टि यं च वयं द्विष्मो वाजस्यैनं प्रसवेनापोहामि ॥ न्यु
न ब्जेन सव्येन पाणिना प्रतीचीमुपभृतीं प्रेरयति ॥ दर्शे अग्नेर्विष्णोरिंद्राग्न्योरुज्जितिम
नूज्जयत्वयं य० अग्निर्विष्णुरिंद्राग्नी तमपनुदंतु त्वयं यजमानो ॥ द्वेष्टि यश्चेन द्वेष्टि ॥१९॥
वाजस्यैनं प्रसवेनापोहामि ॥ अभ्युक्ष्य जुह्वा परिधीननन्क्रियथापूर्वं ॥ ५ ॥ वसुभ्य

इतिप्रतिमंत्रं॥ॐ वसुभ्यस्त्वानज्मि।ॐ रुद्रेभ्यस्त्वा।नज्मि।ॐ आदित्येभ्यस्त्वा नज्मि
।निधाय स्रुचं॥ नमस्तरं करोति॥ अथ मंप परिधिं गृहीत्वा आश्राव्याह॥ॐ श्रावय॥अस्तु
श्रौषट्॥इषितो दैव्या होतारो भद्रवाच्याय प्रेषितो मानुषः सूक्तवाकाय सूक्ता ब्रूह
हि॰ संजानाथा मिति प्रस्तरादानं॥ॐ संजानाथां॰ विधृती स्थाने कृत्वा॥अनक्तं नमं तो॰४
नुचमद्वति अग्रं स्रुचां मध्यमुपभृति॰ मूलमितरस्यां॥ॐ अंतुवयोरि मो रिहाणो॰२
मरुतामितिनी चैर्हत्वा॥ॐ मरुतां॰ वद्दमनस्मात्तृणमादाय॰ इदं द्यावा॰ यजमान
स्त्वनामधेयानि॥अमुक शर्मा॥उपां॰ उत्तरां देव॰ सूक्तवाकांते प्रस्तरप्रक्षेपं करो
ति॥हस्तेनाचरति अनुप्रहर प्रस्तरा गृहीतं तृणं श्रावय। चक्षुष्पाद्वत्यात्मानमालभ
ते॥ॐ चक्षुष्पा॰ असि॰ हि॥उदकोप॰ यजमान प्रोषिते सति॰ अहं त्वदस्मि मदसि

॥दर्शपौ०॥ सन्नेम मत्त्वं यो निल्लवयो निरस्मि ॥ मुमेव सं दिद्वे वेक्षुधिपुत्रः पित्रे लोककृज्जातवे
॥२०॥ दः स्वाहा ॥१॥ अहं त्वदस्मि ०वेदः स्वाहेति ॥ हस्तेन भागं होमं ॥ ततस्तृणप्रासः आग्नी
ध्रः संवदस्व ॥ अध्व० अगानग्नीत् ॥ आ० अगन् ॥ अ० श्रावय ॥ अ० श्रौषट् ॥ अध्व०
20 स्वगा दैव्या होतृभ्यः स्वस्तिर्मानुषेभ्यः शं योर्ब्रूहि ॥ होता ॥ तच्छंयोरावृणीमहे गातुं०
ष्वेदे ॥ अनयेति प्रादेशं वेदिश्रोणौ निधाय ॥ परिधीननुप्रहरति ॥ यं परिधिमि
ति प्रथमं ॥ यं परि० न्ते ॥ इतरौ च युगपत् ॥ अग्नेः प्रियमिति ॥ ॐ अग्नेः० न्तं ॥ सं
स्रव भागा इति सं स्रवं जुहोति ॥ ॐ सं स्रव० वाट् ॥ इदं विश्वेभ्यो देवेभ्यो न मम
॥ घृताची इति धुरि निदधात्यनसि चेत् जुहूं स्रुवे पात्र्यां वा ॥ ॐ घृताचीस्थोऽध ॥२०॥
ने ॥ यज्ञं चतद् इति वेदिमालभते ॥ ॐ यज्ञ० स्व ॥ वेदं होता ॥ स्रुक्स्रुवमध्वर्युः ॥

आज्यस्थालीमग्नीदादाय॥ ६॥ पत्नीसंयाजेभ्यो गार्हपत्यं गच्छंति॥ अध्वर्युः पूर्वदक्षिणेनगा
र्हपत्यं एत्य पूर्वेणापरेणांतरेण पत्नीमेके षामुपविश्य दक्षिणं जान्वाच्येवं सर्वत्र कर्मोपांशु
॥ सोमायानुब्रूहि॰ ॐ आप्या॰ थां॥ स्थालीतश्चतुर्जुह्वांगृहीत्वा॥ ओ॰ अ॰ टू॥ सोमंयज॥ ये३
यजा॰ सोमं संते॰ धिष्वा वौषट्॥ इदं सोमाय॰ त्वष्टुरनुब्रूहि इहत्वष्टारम॰ वर्लिं॰ चतुर्ग्रहणं
त्वष्टारंयजायि॰ हे॰ त्वष्टारं तन्न॰ कामा वौषट्॥ इदं त्वष्ट्रे॰ तृतीयेन तद्धोनं पुरस्तात् पत्न्यन्वा
रभंते॥ देवानां पत्नीभ्योनुब्रूहि॥ देवानां पत्नी॰ ता॥ चतुर्ग्रहणं॥ ओ॰ अ॰ टू॥ देवानांपत्नीर्य
ज॥ ये३ हे देवानां पत्नीरु॰ नां वौषट्॰॥ इदं देवानां पत्नीभ्यो नमम॥ अन्तर्धानेन निरस्य॥
अग्नये गृहपतयेनुब्रूहि॥ अग्निर्होता गृहपति॰ ता वौ॥ चतुर्गृहीत्वा ॰॥ ॐ अ॰ टू॥ अ
ग्निंगृहपतिंयज॥ ये३ हेग्निं गृहपतिं सी वौषट्॥ सद्योषं जुहुयात॥ इदमग्नये गृहपतये॰ ५

लंगली

।। दर्शपौ० । सर्वंवदिडां कृत्वा स्रुवेनैडे नाज्येन होतुरंगुलिपर्वण्य नक्ति ।। मनस्पति० प्रा० वाचस्पति० उ० ।।
।।२१।। अवांतरेडा मादधाति प्रथमः स्वयं पंचमः ।। उपहूतंं उपहूतेयं पस्तुत्तरस्यां देवयज्यायामु
पहूता० नुपहूता ।। सर्वंतूष्णीं प्राश्य लौकिकपवित्राभ्यां मार्जनं ।। स्रुकू स्रवं गृहीत्वा ।। संं
स्रुस्रवां जुहोति अग्नेरध्यायेइति ।। ॐ अग्नेरध्यायो० वाह् ।। इदमग्नये अदध्याय वे
अतीतमायन ०।। सव्येनारस्य दक्षिणाग्नौ जुहोत्य यमयइति सरस्वत्या इतिच ।। सकृद्गृही
ता ।। ॐ अग्नये संवेशपुतये स्वाहा ।। इदमग्नये संवेशपतये० ॐ सरस्वत्यै यशोभ
ग्निन्यै स्वाहा ।। इदं सरस्वत्यै यशोभग्न्यै न० पिष्टलेपं जुहोति ।। सवज्रः ।। ॐ उलूख
लेमुसले० का माः स्वाहा ।। इदमग्नये न० पत्नी वेदं प्रमुंचति ।। वेदोसीति ।। यो कंच ।। वेदोसि० ।।२१।।
भव ।। प्रमामुंचामि वरुणस्य पाशाद्येन माबध्नात्सविता सकृशो वः ।। कतस्य योनौ सुकृतस्य लो

केरिष्टां मा सह पत्न्यार्धालिनि॥ वेदतृणं गृही त्वा॥ वेदं स्तृणा त्यो वेदः॥ होता आहवनीये समिधमार्धाति तूष्णीं॥ यथेतं निष्क्रामयेद्धोता॥ ध्रौवमाज्यं जुह्वां समानीय समिष्ट यजुर्जुहोति॥ देवागातु विदइति॥ ॐ देवागा० धाः॥ इदं वातायन० संबर्हिरिति बर्हिर्होमः॥ ॐ संबर्हि० यरस्वाहा॥ इदं दिव्यायनभसेन० वेद्यां प्रणीताप्रैनयनं॥ आहनीयं परीत्य करुवति०ॐ करुवा विमुं० पाशायनिनयामि॥ पुरोडाशकपालेन करुणानेपा स्य त्यधः कृष्णाजिनं रक्षसामिति॥ ॐ रक्षसां भागोसि० नात्रोदकस्पर्शः॥ पूर्णपात्रं निनयति॥ परीत्य संततं धारयायजमानो जलि नाप्रतिगृह्णाति॥ संवर्चसेति ॐ संवर्चसा० तूष्णीं मुखं विमृष्टे॥ विष्णुक्रमानुक्रमनेदिदि विष्णुरिति प्रतिमंत्रं॥ ॐ ॐ दिविविष्णु० जागतेन छंदसा ततो निर्भक्तो यो स्मान्द्वेष्टि० द्विष्मः॥ दक्षिणवद्यांप्रा

निनयामि

यो दिशो ततो यज्ञस्य

॥दर्शपौ०॥ मां गच्छन्ति॥ सर्व्वं पात्रं ततो वाग्विसर्जनं वाचमवस्थापयन्ति॥ अंतरिक्षे॰ त्रैष्टुभेन॰ छन्दसा विष्णुः॥ पृथिव्यां विष्णुः॰
॥२२॥ गायत्रेण छं॰ तृतीयं अस्मादन्नाद्दिति भागमवेक्षते॥ अस्मादन्नान्निर्भक्तो यो स्मान्द्वेष्टि यं
च वयं द्विष्मः॥ अस्यै प्रतिष्ठा य इति भूमिं॥ अस्यै प्रतिष्ठाया निर्भक्तो यो॰ ष्मः॥ अगन्म स्व
रिति प्राक्॥ ॐ अगन्म स्वः॥ सं ज्योतिषेत्याहवनीयमवेक्षते॰॥ ॐ सं ज्योतिषाभूम॥
स्वयंभूरिति सूर्यं॥ स्वयंभूरसि॰॥ देहि। वर्च्चोदा इतियं वा कामं कामयते॥ सूर्यस्येत्या
वर्त्तते प्रदक्षिणं॥ सूर्यस्यावृतमन्वावर्त्ते॥ गार्हपत्यमुपतिष्ठते ग्ने गृहपत इति॥ अग्ने गृ
हपते सुभूयाः॥ अस्थूरिणो॰ हिमाः॥ तिष्ठे॰ सूर्यस्य त्यावर्त्तते प्रदक्षिणं। सूर्यस्याव
तमन्वावर्त्ते॥ गच्छति प्राक् उरु विष्ण इति॥ ॐ उरु विष्णो॰ तनोसि तनु॰ लोके॥ इदमहं मे ॥२२॥
कर्मेदं वीर्यं पुत्रः॥ अमुकशर्म्मा अनुसंतनोतु॥ इति मं त्र्यावृत्याया वत्सुतं नामगृह्णाति।

पुत्राभावे आत्मनाम ग्रहणं ॥ तं तवेत्त्वा ज्योतिषे त्वेतिवा ॥ आदद्वेनायमुपतिष्ठनेतत् स्त्रीव्रत
विसर्गः ॥ येनोपयात् ॥ अग्नेव्रतपते व्रतमचारिषं तदशकं तन्मे राधि ॥ संचर विमोकः ॥
संयज्ञपतिराशिषेति भागं प्राश्नाति ॥ संयज्ञपतिराशिषायुज्यतां ॥ ब्रह्मभागं प्राश्ना
ति ॥ ब्राह्मणं तर्पयितवेत्यध्वर्युः ॥ यजमानस्तर्पयति ॥ ८ ॥ अस्या अमुकं इष्टेः सम्
ध्यर्थं ब्राह्मणमेकं यथासंपन्नेनान्नेन तर्पयिष्ये ॥ अस्मात्कर्मापवर्गे समिधमादधाति
॥ जुहोत्यूपतिष्ठते वा स्रुवा पयहः ॥ ॐ नमः कृतायकर्मणे अकृताय कर्मणे नमः ॥ अया
इय ज्ञजातवेदा अंतरः पूर्वो अस्मिन्निषद्य ॥ सन्वं सनिं मृविमुञ्चाविमुंचधेह्यस्मभ्यं द्र
विणं जातवेदः स्वाहा ॥ यथेतमेस्येतनब्रह्मत्वमिद्धिपथो ॥ ततोत्तीर्थेन निष्क्रामति ॥ यजमानोपि
तीर्थेन निष्क्रामति ॥ यस्य स्मृत्वा च नामोक्त्या तपोयज्ञक्रियादिषु ॥ न्यूनं संपूर्णतां याति सद्यो वंदे तमच्यु
तं ॥
स्मा

पद्धति

॥ दर्शपौर्णमासे हेषयज्ञः ॥ यत्कर्मणत्यू० द्यौः शांतिः ॥ ब्रह्मार्पणं ॥ आ विवेद्य ॥ नमस्ते गार्हपत्याय नम
॥२३॥ स्ते दक्षिणाग्नये ॥ नम आहवनीयाय महावेद्यै नमोनमः ॥ नमस्सभ्यावसथ्याभ्यां नमस्ते
परमात्मने ॥ महाराजेकराजाय नमस्ते भक्तवत्सल ॥ चतुर्भिश्च चतुर्भिश्च विश्ववेत्तेन
मोनमः ॥ इति दर्शपौर्णमासपद्धति समाप्तः ॥ श्री यज्ञनारायणार्पणमस्तु ॥ इदं पुस्त
क धुंडिराजभट्ट कीटकरणे बल्लाळ जजनार्दन चित्त पूर्ण उप नाम तात्मण करस्य हस्तेन
लिखित्वा संवत् १९०२ नळ नाम संवत्सर फाल्गुन शुक्ल द्वादश्यां समाप्त श्लोक संख्या
॥६॥ योक्ककरणश्लोक ॥ रज्जुरष्टोत्तरमो जीशतहस्तापुरामता ॥ त्रिरत्नासा चतुस्त्रिंशत्करमाना ॥५५०॥
भवेत्तत ॥१॥ तन्मध्यतोष्टहस्तानु कुंडरूपं च कारयेत् ॥ तत्कुंडं त्रिरदभ्यस्यण ग्राह्यं यथोक्तं भवेत् ॥२॥ ॥२३॥
तयो क्रव्याममानेतु नैषो जायाकटैन्यसेत् ॥ छ ॥